No. ५९८ ख

Title वैदोक्त शिवार्चन पद्धतिः

Author

Extent ७ पत्र Age सं. १९३०

Subject कर्मकाण्ड (धर्मशास्त्र)

शिवार्चनवेदोक्तपद्धतिः

श्लो· [illegible]२६

नं ५८॥

३

ॐ श्रीगणेशाय नमः ॥ अथ वेदोक्त शिवार्चन पद्धति ॥ तत्र प्रथम मात्मविन्यासः ॥ यातेरुद्र शिवातनूरघोरा
पापकाशिनी तयानस्तन्वाशन्तमया गिरिशन्ताभिचाकशीहि १ शिखायाम् ॥ असिन्महत्यर्णवेन्त
रिक्षे भवा अधि तेषां सहस्रयोजनेवधन्वानि तन्मसि २ ॥ शिरसि ॥ असंख्याता सहस्राणि ये रुद्रा
अधिभूम्याम् तेषां सहस्रयोजनेवधन्वानि तन्मसि ॥ ललाटे ॥ वयꣳ सोम व्रते तव मनस्त
नूषु बिभ्रतः प्रजावन्तः सचेमहि ॥ भ्रुवोर्मध्ये ॥ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् उ
र्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ५ नेत्रयोः ॥ अग्निर्ज्योतिर्ज्योतिरग्निः स्वा
हा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्व
र्चः स्वाहा ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ॥ तृतीयनेत्रे ॥ नमः स्रुत्याय च पथ्याय च
नमः काट्याय च नीप्याय च नमः कुल्याय च सरस्याय च नमो नादेयाय च वैशन्ताय च ७ कर्ण
योः ॥ मानस्तोके तनये मान आयुषि मानो गोषु मानो अश्वेषु रीरिषः मानो वीरान्रुद्र भामि
नो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ८ ॥ नासिकयोः ॥ अवतत्य धनुष्ट्वꣳ सहस्राक्ष शते
षुधे निशीर्य शल्यानां मुखा शिवो नः सुमना भव ९ ॥ मुखे ॥ नमो वञ्चते परिवञ्चते स्तायूना
म्पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणाम्पतये नमो नमः सृकायिभ्यो जिघांसद्भ्यो
मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तं
चरद्भ्यो विकृन्तानां पतये नमः १० ग्रीवायाम् ॥

नरह
राह

शिव
१

नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा ऽउपश्रिताः तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि
११ ॥ कंठदेशे ॥ नमस्ते ऽआयुधायानातताय धृष्णवे उभाभ्यामुत तेनमो बाहुभ्यान्तव ध
न्वने १२ ॥ बाहोः ॥ ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः तेषाꣳ सहस्रयोजने
व धन्वानि तन्मसि १३ ॥ हस्तयोः ॥ नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजा
य च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च १५ ॥ अङ्गुलिषु ॥ नमः
पर्णाय च पर्णशदाय च नम ऽउद्गुरमाणाय चाभिघ्नते च नम ऽआखिदते च प्रखिदते च
नम ऽइषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विचि
न्वत्केभ्यो नमो विक्षिणत्केभ्यो नम ऽआनिर्हतेभ्यः १६ ॥ हृदये ॥ नमो गणेभ्यो गणपति
भ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो
नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ॥ १७ ॥ पृष्ठे ॥ विकिरिद्र विलोहित नम
स्ते ऽअस्तु भगवः यास्ते सहस्रꣳ हेतयोन्यमस्मन्निवपन्तु ताः ॥ १७ ॥ उदरे ॥ नमः
शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवत
राय च ॥ १८ ॥ दक्षिणकुक्षौ ॥ द्रापे ऽअन्धसस्पते दरिद्र नीललोहित आसाम्प्रजानामे

॥ ५ ॥

२
2

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत् । स दाधार पृथिवीन्द्यामुतेमाङ्कस्मै
देवाय हविषा विधेम ॥२०॥ नाभौ ॥ मीढुष्टम शिवतम शिवो नः सुमना भव परमे वृक्षऽआयुधं
न्निधाय कृत्तिं वसानऽआचर पिनाकं बिभ्रदागहि ॥२१॥ कट्यां ॥ शिवो नामासि स्वधिति
स्ते पिता नमस्तेऽअस्तु मा मा हिꣳसीः । निवर्त्तयाम्यायुषेऽन्नाद्याय प्रजननाय रायस्पोषा
य सुप्रजास्त्वाय सुवीर्याय ॥२२॥ लिङ्गे ॥ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभ
रामहे मतीः । यथा शमसद्द्विपदे चतुष्पदे विश्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥२३॥
गुह्ये ॥ इषे त्वोर्ज्जे त्वा वायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्म्मणऽआप्या
यध्वमघ्न्याऽइन्द्राय भागं प्रजावतीरनमीवाऽअयक्ष्मा मा व स्तेनऽईशत माघशꣳ
सो ध्रुवाऽअस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ॥२४॥ वृषणयोः ॥ मा
नो महान्तमुत मा नोऽअर्भकं मा नऽउक्षन्तमुत मा नऽउक्षितम् । मा नो वधीः पितरं मोत
मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥२५॥ ऊर्वोः ॥ एष ते रुद्र भागः सह स्वस्राम्बि
कया तञ्जुषस्व स्वाहैष ते रुद्र भागऽआखुस्ते पशुः ॥२६॥ जानुनोः ॥ नमो ज्येष्ठाय च कनि
ष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय

नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च सवृधे च नमो ऽग्र्याय च प्र
थमाय च ॥२८॥ गुल्फयोः ॥ ये पथां पथिरक्षय ऐलबृदा आयुर्युधः तेषां ॐ सह
स्रयोजने ऽव धन्वानि तन्मसि ॥२९॥ पादयोः ॥ अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्
अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यो धराचीः परासुव ॥३०॥ कवचं ॥ नमो बिल्मि
ने च कवचिने च नमो वर्मिणे च वरूथिने च नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्या
य चाहनन्याय च ॥३१॥ अस्त्रं ॥ विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ ऽउत अनेश
न्नस्येषव ऽआभुरस्य निषङ्गधिः ॥३२॥ धनुः ॥ यत्र बाणाः सम्पतन्ति कुमा
रा विशिखा ऽइव तन्न ऽइन्द्रो बृहस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म
यच्छतु ॥३३॥ बाणः ॥ विकिरिद्र विलोहित नमस्ते ऽअस्तु भगवः याः ते सहस्र
॰ हेतयो ऽन्यमस्मन्निवपन्तु ताः ॥३४॥ खड्गः ॥ य ऽएतावन्तश्च भूया ॐ सश्च दिशो
रुद्रा वितस्थिरे तेषां ॐ सहस्रयोजने ऽव धन्वानि तन्मसि ॥३५॥ दिग्बंधनं ॥ एवं
न्यासविधिं कृत्वा शिवो ऽहमिति भावयेत् ॥ एवं शिवलिङ्गे विन्यासविधिं कुर्यात् ॥ छ ॥
अथ पूजा ॥ मा नो महान्तमुत मा नो ऽअर्भकं मा न ऽउक्षन्तमुत मा न ऽउक्षितम् ॥ मा

ऋ्ग्र्यो बाच दधिवक्रा प्रथमो देव्यो भिषक् ऋहीं श्च सर्वान्जम्भयन्त्सर्वा श्च यातुधान्यो ध
राचीः परासुव ॥४०॥ आचमनीयम्॥ असौ यस्ताम्रोऽअरुणऽउत बभ्रुः सुमङ्गलः। ये चैन
ठं॰ रुद्राऽअभितो दिक्षु श्रिताः सहस्रशो वैषां ठं हेडऽईमहे ॥४१॥ स्नानम्॥ अथ
पञ्चामृतस्नानम्॥ आप्यायस्वेति गौतमऋषिः सोमो देवता गायत्रीछन्दः क्षीरस्नाने
विनियोगः॥ ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य संगथे ॥४२॥
ॐ पयः पृथिव्यां पयऽओषधीषु पयो दिव्यन्तरिक्षे पयो धाः। पयस्वतीः प्रदिशः सन्तु
मह्यम्॥४३॥ इति पयस्नानम्॥ ॐ असौ यस्ताम्रोऽअरुणऽउत बभ्रुः सुमङ्गलः। ये
चैनठं॰ रुद्राऽअभितो दिक्षु श्रिताः सहस्रशोवैषां ठं हेडऽईमहे ॥४४॥ देवस्य त्वा
सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्॥४५॥ इति शुद्धस्नानम्॥
दधिक्राव्ण इत्यस्य दधिक्रावा ऋषिः सुरभिर्देवताऽनुष्टुप्छन्दः दधिस्नाने विनि
योगः॥ ॐ दधिक्राव्णोऽअकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखाकरत्प्रणऽ
आयूठं॰षि तारिषत्॥ इति दधिस्नानम्॥४६॥ पुनः शुद्धस्नानम्॥ शुक्रमसि
इत्यस्य यजुषः प्रजापतिर्ऋषिराज्यं देवतानुष्टुप्छन्दः आज्यस्नाने विनियोगः॥ ॐ
शुक्रमसि ज्योतिरसि तेजोऽसि॥ ॐ घृतवती
भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सु
पेशसा द्यावापृथिवी वरुणस्य धर्मणा विष्कभि
तेऽअजरे भूरिरेतसा॥४७॥ ॐ घृतं घृत
पावानः पिबत वसां वसापावानः पिबतान्तरिक्ष
स्य हविरसि स्वाहा दिशः प्रदिशऽआ
दिशो विदिशऽउद्दिशो दिग्भ्यः स्वाहा॥ घृतस्ना
नम्॥ पुनः शुद्धस्नानम्॥

३

श्राव. ३

मधुवाताऽइतिमंत्रस्यगौतमऋषिर्म्मधुदेवतागायत्रीछन्दोमधुस्नाने विनियोगः॥ ॐमधुवाताऽऋ
तायतेमधुक्षरंतिसिंधवः माद्ध्वीर्न्नः सन्त्वोषधीः ४९ हैमधुनक्तमुतोषसो मधुमत्पार्थिवꣳ र
जः मधुद्यौरस्तुनः पिता ५० मधुमान्नोवनस्पतिर्म्मधुमाꣳ२ऽ अस्तु सूर्य्यः माद्ध्वीर्गावो भव
न्तुनः ५१ इतिमधुस्नानम्॥ पुनः शुद्धस्नानम्॥ स्वादुषवस्वेतिमंत्रस्यवैणुऋषिः सोमा
त्मिका शर्करादेवता जगती छन्दः शर्करास्नाने विनियोगः॥ ॐस्वादुषवस्वदिव्यायज
न्मने स्वादुरिन्द्राय सुहवीतुनाम्ने स्वादुर्म्मित्राय वरुणाय वायवे बृहस्पतये मधु
रँ॥ऽ= मा ꣳ२ऽ अदाभ्यः॥५२॥ ॐ अपा ꣳ रसमुद्वयसꣳ सूर्य्ये सन्तꣳ समाहितम् अपा
ꣳ रसस्ययो रसस्तं वो गृह्णाम्युत्तमम्॥५३॥ इतिशर्करास्नानम्॥ ॐअसौयस्ता
म्रोऽअरुणऽउतबभ्रुः सुमङ्गलः येचैनꣳ रुद्राऽअभितोदिक्षुश्रिताः स
हस्रशोवैषा ꣳ हेडऽईमहे ॐदेवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्या =
म्पूष्णो हस्ताभ्याम्॥ ५४॥ पुनः शुद्धस्नानम्॥ इतिद्रव्यामृतस्नान रँ

४

4

श्राव. ४

ॐ अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यो धराचीः
परासुव ५५ पुनराचमनीयम् ॥ ॐ असौ योऽवसर्पति नीलग्रीवो विलोहितः उतैनं गोपा ऽअदृश्रन्न
दृश्रन्नुदहार्य्यः स दृष्टो मृडयाति नः ५६ वस्त्रम् ॥ ॐ परिधास्यै यशोधास्यै दीर्घायुत्वाय ज
रदष्टिरस्मि शतञ्च जीवामि शरदः पुरूचीरायस्पोषमभिसंव्ययिष्ये ॥५७॥ इति वस्त्रे एकादि
वन्धनम् ॥ ॐ नमोस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे अथो ये अस्य सत्वानो हन्तेभ्योऽकरन्न
मः ॥५८॥ इति यज्ञोपवीतम् ॥ ॐ प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् याश्च ते हस्तऽइ
षवः परा ता भगवो वप ॥५९॥ ॐ गन्धो हैवास्य सुगन्धि तेजनं तद्यत्सु मे गन्धि तेजनमभ
वती गन्धेनैवेन मेतत्समर्द्धयति ॥६०॥ इति गन्धः ॥ ॐ अक्षन्नमीमदन्त ह्यव प्रियाऽ
अधूषत अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजान्विन्द्र ते हरी ॥६१॥ इति अक्ष
तः ॥ ॐ विज्यन्धनुः कपर्दिनो विशल्यो बाणवाँ२ऽउत अनेशन्नस्य याऽइषवऽआभु
रस्य निषङ्गधिः ॥६२॥ याः फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः
वृहस्पति प्रसूतास्तानो मुञ्चन्त्वꣳहसः ॥ करवीरबिल्वपत्राणि पुष्पाणि महे
श्वर सुगन्धीनि भवानीशः शिवत्वं कुसुम प्रिय ॥६३॥ इति पुष्पाणि ॥

नमो बिल्मिने च कवचिने च नमो वर्म्मिणे च वरूथिने च नमः श्रुताय च श्रुतसेनाय च नमो दुन्दु
५ भ्याय चाहनन्याय च ६४ अमृतोद्भवं श्रीवृक्षं शङ्करस्य सदा प्रियं तत्ते शम्भो प्रयच्छामि बि
ल्वपत्रं सुरेश्वर ६५ ॥ इति बिल्वपत्राणि ॥ ॐ या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः त
या स्मान्विश्वतस्त्वमयक्ष्मया परि भुज ६६ ॐ धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान्धू
र्वति तं धूर्व यं वयं धूर्वामः देवानामसि वह्नितमं सस्नितमं पप्रितमं जुष्टतमं दे
वहूतमम् ॥ इति धूपः ॥ परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः अथो य इषु
धिस्तवारे अस्मन्निधेहि तम् ६८ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्यो
तिः सूर्यः स्वाहा अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा ज्यो
तिः सूर्यः सूर्यो ज्योतिः स्वाहा ६९ इति दीपः ॥ अवतत्य धनुष्ट्वं सहस्राक्ष शतेषुधे
निशीर्य शल्यानां मुखा शिवो नः सुमना भव ७० अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मि
णः प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ७१ इति नैवेद्यम् ॥ आ
थैवाच० ॥ पुनराचमनीयम् ॥ ७२ ॥ नमस्त आयुधायानातताय धृष्णवे उभा
भ्यामुत ते नमो बाहुभ्यां तव धन्वने ७२ इति मुखवासः ॥ नमः पर्ण्याय च पर्णश

शिव० ५

दायचनमऽउद्गुरमाणाय चाभिघ्नतेच नमऽआखिदतेच प्रखिदतेच नमऽइषुकृद्भ्यो धनु
ष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवानाᳬ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो
विक्षिणत्केभ्यो नमऽआनिर्हतेभ्यः ७३ इति तामूलम्॥ हिरण्यगर्भः समव
र्तताग्रे भूतस्य जातः पतिरेकऽआसीत् स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हवि
षा विधेम ॥७४॥ इति दक्षिण॥ अथ ध्यानम्॥ ॐ शुद्धस्फटिकसङ्काशं त्रिनेत्रं पञ्चव
क्त्रकम् गंगाधरं दशभुजं सर्वाभरणभूषितम् ७५ नीलग्रीवं शशाङ्काङ्कं नागयज्ञो
पवीतिनं व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदं कमण्डल्वक्षसूत्राभ्यामन्वितं शूलपाणि
नम्। ज्वलन्तं पिङ्गलजटाशिखामुद्योतकारिणम् ७६ अमृतेनाप्लुतं हृष्टमुमादेहा
र्द्धधारिणम् दिव्यसिंहासनासीनं दिव्यभोगसमन्वितं ७७ दिग्देवतासमायुक्तं सुरा
सुरनमस्कृतं नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम् ७८ सर्वव्यापिनमीशानं रुद्रं
वै विश्वरूपिणम् एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारभेत् ७९ इति ध्यानम्॥
तद्यथा पुष्पोदकेन तर्पयेत्॥ भवं देवं तर्पयामि। शर्वं देवं तर्पयामि। ईशानं देवं

तर्पयामि। पशुपतिं देवं तर्पयामि। रुद्रं देवं
तर्पयामि। उग्रं देवं तर्पयामि। भीमं देवं तर्प
यामि। महान्तं देवं तर्पयामि। देवदेवं तर्पया
मि। ॐ ज्येष्ठाय नमः" पुनराचमनीयम्॥ ४८

ॐ श्रेष्ठाय नमः। मधुपर्कः। मधुपर्कं
दध्याज्य[illegible] मधुपर्कं दीयता मधुप
र्क प्रदानेन प्रीतो भव महेश्वर कालाय नमः॥

श्रीरुद्रपीपिकाः ॥ इतिश्रीदशिष्या ॥ २२ ॥

॥गन्धः॥कलविकरणायनमः पुष्पाणि सर्वभूतदमनायनमः ॥ धूपः॥ मनोन्मनायनमः॥दीपः॥
भवोद्भवायनमः कालनैवेद्यम् ॥ अष्टौपुष्पांजलयः ॥ ॐभवायदेवायनमः। शार्वायदेवा
यनमः ईशानायदेवायनमः। पशुपतेदेवायनमः रुद्रायदेवायनमः उग्रायदेवायनमः
भीमायदेवायनमः महतेदेवायनमः भवस्यदेवस्यपत्न्यैनमः शार्वस्यदेवस्यपत्न्यैनमः
ईशानस्यदेवस्यपत्न्यैनमः पशुपतेर्देवस्यपत्न्यैनमः रुद्रस्यदेवस्यपत्न्यैनमः उग्रस्य
देवस्यपत्न्यैनमः भीमस्यदेवस्यपत्न्यैनमः महतोदेवस्यपत्न्यैनमः ॐअघोरेभ्योथघो
रेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः सर्वशर्वेभ्योनमस्तेऽअस्तुरुद्ररूपेभ्यः ॥ॐतत्पुरु
षायविद्महे महादेवायधीमहितन्नोरुद्रः प्रचोदयात् ॥ ततः शार्वायक्षितिमूर्तये
नमः भीमायाकाशमूर्तयेनमः पशुपतयेयजमानमूर्तयेनमः महादेवायसोममू
र्तयेनमः ईशानायसूर्यमूर्तयेनमः ॥ एवंसंपूज्य ॥ ॐहिरण्यगर्भः समवर्त्तता
ग्रेभूतस्यजातः पतिरेकऽआसीत् सदाधार पृथिवीन्द्यामुतेमांकस्मैदेवायहवि
षाविधेम ॥ ॐआरात्रिपार्थिवꣳरजः पितुरप्रायि धामभिः ॥ दिवः सदाꣳसि

बृहती वितिष्ठसऽआत्वेषंवर्त्ततेतमः ॥
इत्यारात्रिकम् ॥ ॐमानोमहान्तमुतमानो
ऽअर्भकम्मानऽउक्षन्तमुतमानऽउक्षितम्
मानोवधीः पितरम्मोतमातरम्मानः प्रियास्त ४

शिव

ॐ अस्य श्री षड़क्षर स्तोत्र मंत्रस्य वामदेव ऋषी पंक्ति छंदः सदाशिवो देवता चतुर्वर्ग
पुरुषार्थ जप विनियोगः ॥ ॐ अंगुष्ठाभ्यां नमः । नं तर्जनीभ्यां नमः मं मध्यमाभ्यां न
मः शिं अनामिकाभ्यां नमः वां कनिष्टिकाभ्यां नमः यं करतलकर पृष्ठाभ्यां नमः
एवं हृदयादि न्यासः ॥ ततः पुनः षड़ङ्गादि पाठः ततः षड़क्षर मंत्र जपः ॥ अ
थ विसर्जन ध्यानं ॥ ॐ कर्पूरगौरं करुणावतारं संसारसारं भुजगेंद्र हारं स
दा वसंतं हृदयारविंदे भवं भवानी सहितं नमामि ॥१०॥ इति श्री शिवप
द्धतिः समाप्तः ॥ शुभम् ॥ सं. १९३० भाद्रपद प्र. ८ ॥ लिखितं शालिग्रामे
ण ॥ शुभम् ॥ श्री शारदायै नमः ॥ शुभम् । शुभम् । शुभम् ॥

तत्सत् अद्य भाद्रपदमासे शुक्लपक्षे अमुकतिथौ अमुकगोत्रोऽहं लालास्याना
वन्नोऽमुकशर्माहं भारद्वाजगोत्रस्य श्रीमन्महाराजाधिराजरणकेवी
र सिंह वर्मणो यजमानस्य अमात्यादिसकलपरिवारान्वितस्य स्वाक्रां
तराज्योपद्रवशान्त्यर्थं शिवपूजनपूर्वकखड्गपाठमहं करिष्ये ॥

॥ श्रीरामायनमः ॥

शिवु.